### ( 2 ) मदलेखा.

Def. मस्गौ स्यान्मदलेखा ।
Sch. G. म, स, ग. ( 3. 4 )
Ex. रंगे बाहुविरुग्णाद् दंतींद्रान्**मदलेखा** ।
लग्नाभून्पुरशत्रौ कस्तूरीरसचर्चा ॥

### ( 3 ) मधुमती.

Def. ननगि मधुमती ।
Sch. G. न, न, ग ( 5. 2 )
Ex. रविदुहितृतटे वनकुसुमततिः ।
व्यधित मधुमती मधुमथनमुदम् ॥

---

*Metres with 8 Syllables in a quarter.*

## ( अनुष्टुभ् )

### ( 1 ) अनुष्टुभ् ( also called श्लोक ).

There are several varieties of this metre, but that which is most in use has eight syllables in each quarter, but of variable quantity. Thus the fifth syllable of each quarter should be short, the sixth long, and the seventh alternately long and short.

श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पंचमम् ।
द्विचतुःपादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः ॥

Ex. वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वंदे पार्वतीपरमेश्वरौ ॥ R. 1. 1.

### ( 2 ) गजगति.

Def. नभलगा गजगतिः ।
Sch. G. न, भ, ल, ग( 4. 4. )
Ex. रविसुतापरिसरे विहरतो दृशि हरेः ।
व्रजवधू**गजगति**र्मुदमलं व्यतनुत ॥

### ( 3 ) प्रमाणिका

Def. प्रमाणिका जरौ लगौ ।
Sch. G. ज, र, ल, ग ( 4. 4 )
Ex. पुनातु भक्तिरच्युता सदाच्युतांघ्रिपद्मयोः ।
श्रुतिस्मृति**प्रमाणिका** भवांबुराशितारिका ॥

### ( 4 ) माणवक

Def. भात्तलगा माणवकम् ।
Sch. G. भ, त, ल, ग, ( 4. 4 )
Ex. चंचलचूडं चपलैर्वत्सकुलैः केलिपरम् ।
ध्याय सखे स्मेरमुखं नंदसुतं माणवकम् ॥

### ( 5 ) विद्युन्माला

Def. मो मो गो गो विद्युन्माला ।
Sch. G. म, म, ग, ग, ( 4. 4 )
Ex. वासोवल्ली **विद्युन्माला** बर्हश्रेणी शाक्रश्चापः ।
यस्मिन्नास्तां तापोच्छित्त्यै गोमध्यस्थः कृष्णांभोदः॥

### ( 6 ) समानिका

Def. ग्लौ रजौ समानिका तु ।
Sch. G. र, ज, ग, ल ( 4. 4. )
Ex. यस्य कृष्णपादपद्ममस्ति हृत्तडागसद्म ।
धीः **समानिका** परेण नोचितात्र मत्सरेण ॥

---

*Metres with 9 Syllables in a quarter.*

## ( बृहती )

### ( 1 ) भुजगशिशुभृता

Def. भुजगशिशुभृता नौ मः ।
Sch. G. न, न, म ( 7. 2 )
Ex. ह्रदतटनिकटक्षोणौ भुजगशिशुभृता याऽसीत् ॥
मुररिपुदलिते नागे व्रजजनसुखदा साऽभूत् ॥

### ( 2 ) भुजंगसंगता

Def. सजरैर्भुजंगसंगता ।
Sch. G. स, ज, र, ( 3. 6 )
Ex. तरला तरंगरिंगितैर्यमुना भुजंगसंगता ।
कथमेति वत्सचारकश्चपलः सदैव तां हरिः ॥

### ( 3 ) मणिमध्य

Def. स्यान्मणिमध्यं चेद्भमसाः ।
Sch G. भ, म, स, ( 5. 4 )
Ex. कालियभोगाभोगगतस्तन्मणिमध्यस्फीतरुचा ।
चित्रपदाभो नंदसुतश्चारु ननर्त स्मेरमुखः ॥

---

*Metres with 10 Syllables in a quarter.*

## ( पंक्ति )

### ( 1 ) त्वरितगति

Def. त्वरितगतिश्च नजनगैः ।
Sch. G. न, ज, न, ग ( 5. 5 )
Ex. त्वरितगतिर्व्रजयुवतिस्तरणिसुता विपिनगता ।
मुररिपुणा रतिगुरुणा परिरमिता प्रमदमिता ॥

### ( 2 ) मत्ता

Def. ज्ञेया मत्ता मभसगसृष्टा ।
Sch. G. म, भ, स, ग ( 4. 6 )
Ex. पीत्वा मत्ता मधु मधुपाली
कालिंदीये तटवनकुंजे ।
उद्दीव्यंतीर्व्रजजनरामाः
कामासक्ता मधुजिति चक्रे ॥

### ( 3 ) रुक्मवती

( Also called चंपकमाला ).

Def. रुक्मवती सा यत्र भमस्गाः ।
Sch. G. भ, म, स, ग ( 5. 5 )
Ex. कायमनोवाक्यैः परिशुद्धै-
र्यस्य सदा कंसद्विषि भक्तिः ।
राज्यपदे हर्म्यालिरुदारा
रुक्मवती विघ्नः खलु तस्य ॥

---

*Metres with 11 Syllables in a quarter.*

## ( त्रिष्टुभ् )

### ( 1 ) इंद्रवज्रा

Def. स्यादिंद्रवज्रा यदि तौ जगौ गः ।
Sch. G. त, त, ज, ग, ग ( 5. 6 )
Ex. गोष्ठे गिरिं सव्यकरेण धृत्वा
रुष्टेंद्रवज्राहतिमुक्तवृष्टौ ।
यो गोकुलं गोपकुलं च सुस्थं
चक्रे स नो रक्षतु चक्रपाणिः ॥

### ( 2 ) उपेंद्रवज्रा

Def. उपेंद्रवज्रा प्रथमे लघौ सा ।
Sch. G. ज, त, ज, ग, ग ( 5. 6. )
Ex. उपेंद्रवज्रादिमणिच्छटाभि-
र्विभूषणानां छुरितं वपुस्ते ।

---

य ⏑ — —; र — ⏑ —; त — — ⏑; भ — ⏑ ⏑; ज ⏑ ⏑; स ⏑ ⏑ —; म — — —; न ⏑ ⏑ ⏑; ल ⏑ ग; —